॥ શ્રી ॥
અથ શ્રી ત્રિવિક્રમપંડિતાચાર્યસુત શ્રી નારાયણપંડિતાચાર્યવિરચિતઃ
॥ શ્રી મધ્વવિજયઃ ॥
૮. અષ્ટમઃ સર્ગઃ
પ્રતિભાપ્રભાપ્રમુખસદ્ગુણૈર્નિજૈઃ અતિવિસ્મયં નિયમિનાં મનો નયન ।
પુરુધીઃ કદાચિદથ વેદનાયકં વિજને શનૈરુપસસાદ તં વને ॥ ૮.૧ ॥

સુવિશેષશેષવદશેષવર્ણિતપ્રતિબોદ્ધુરસ્ય નનુ શિષ્યતોચિતા ।
ગુરુમાનસસ્ય ગુરુતાઽપિ સત્પતેઃ ઇતિ સોપસત્તિરમરૈરમાન્યત ॥ ૮.૨
॥

પુર એવ પૂરિતમપૂરયત પુનઃ નનુ કૃષ્ણ એષ પરમાર્થસંખ્યયા ।
ભગવન્મનઃ પુરમિવાઽયતં પુરા નિજધામ તાં ચ જગૃહે તદદ્ભુતમ ॥ ૮.૩ ॥

ઇતિહાસસુંદરપુરાણસૂત્રસત્પ્રિયપંચરાત્રનિજભાવસંયુતમ ।
અશૃણોદનંતહૃદનંતતોઽચિરાત પરમાર્થમપ્યગણિતાગમાવલેઃ ॥ ૮.૪ ॥

ઋજુપુંગવસ્ય પરિજાનતઃ સ્વયં સકલં તદપ્યલમનંતજન્મસુ ।
સ્વકૃતોર્વનુગ્રહબલાદમુષ્ય તાં વિશિશેષ શેષશયનઃ પુનર્ધિયમ ॥ ૮.૫ ॥

અથ બાદરાયણસહાયસંપદા પ્રયયૌ પ્રણંતુમમિતાંતરો યુતઃ ।
અપિ નાદિરાયણપદોદિતં હરેઃ વપુરંતરં લસિતમાશ્રમાંતરે ॥ ૮.૬ ॥

તમપશ્ચદાશ્રમવરે પ્રભૂતધીઃ જ્વલનં જ્વલંતમિવ ધૂમવર્જિતમ ।
વરવલ્કલાકલિતમૌંજિમેખલં વિલસજ્જટાવલયમાદિપૂરુષમ ॥ ૮.૭ ॥

અતિદુર્જયેંદ્રિયજયાદિરૂપિણા તપસા વસંતમિવ સંતતં વને ।
નિજરૂપભૂતનિરપેક્ષનિર્મલપ્રચુરાત્મસૌખ્યરતમપ્યનારતમ ॥ ૮.૮ ॥

નયનદ્વયેન નલિનપ્રભામુષા પરિફુલ્લતાવિલસિતેન વિસ્મયાત ।
તમવેક્ષ્ય ધર્મજમધર્મદુર્લભંમનસેતિ ભૂરિતરમાનસોઽસ્મરત ॥ ૮.૯ ॥

જગતાં ચતુર્દશતયં ચતુર્મુખ પ્રમુખૈર્યુતં પ્રળયમાનિનાય યઃ ।
સમમુલ્લસન કમલયૈવ કેવલં પરમઃ સ એષ હિ પુરાણપૂરુષઃ ॥ ૮.૧૦
॥

ત્રિગુણાકૃતિપ્રકૃતિતો ગુરું તતઃ ત્રિવિધામહંકૃતિમમર્ત્યખાન્યતઃ ।
અપિ ભૂતપંચકમિતોઽ઼ઽમંડલં ભગવાનસાવિહ જગંતિ ચાસૃજત ॥ ૮.૧૧
॥

વિધિવાયુવીંદ્રશિવકૌશિકેશકાન અમરામરાનુગનરાસુરાદિકાન ।
સૃજતિ પ્રપાલયતિ હંતિ સંતતં સ્વગતિં પ્રયાપયતિ ચૈષ લીલયા ॥ ૮.૧૨
॥

અગણય્યસદ્ગુણગણો વિદૂષણઃ સ્વવશાખિલોઽપ્યનુપચારતઃ સ્વયમ ।
સ્મૃતિકીર્તનપ્રણતિભિર્વિમુક્તયે સ્વજનસ્ય ચાત્યયમનેકરૂપતામ ॥ ૮.૧૩

www.yousigma.com

॥

ચતુરાનનાય ચતુરઃ પુરાઽઽગમાન પ્રદદાવસાવનિમિષેશ્વરઃ ફ્રભુઃ ।
વિનિહત્ય હિ શ્રુતિમુષં પુરાતનં વપુષોદ્ધતં હયમુખેન સદ્રિપુમ ॥ ૮.૧૪ ॥

અમરેંદ્રવૈરિભુજદંડમંડલપ્રતિકર્ષપુષ્કરપતદ્ધરોદ્ધૃતિઃ ।
વિદધે વરાહવપુષાઽમુનોર્મિમત્સૃતિસિંધુકચ્છપતયાઽઽપ્તરક્ષિણા ॥ ૮.૧૫ ॥

નરસિંહ એષ વિદદાર દારુણં પ્રતિઘોદયેનખરચક્રતેજસા ।
સ્વરિપું ક્ષણેન સરસઃ સ્ફુરત્તનું પૃથુસત્વમિષ્ટજનભીતિભંજનઃ ॥ ૮.૧૬ ॥

અપિ વામનો લળિતબાલ્યવાનચં પ્રતિભાબલેન કૃતદૈત્યકૌતુકઃ ।
ઉપધેરધઃ કૃતબલીંદ્રશાત્રવઃ સ્વજનાય કેવલમદાત પરં પદમ ॥ ૮.૧૭ ॥

કથયંત્યમું પરશુભાસમાનગોહતમર્ત્યદેવતમસં મુહુર્મુહુઃ ।
જગતાં હિતં હરિમિવાપરં હરિં ગુરુશક્તિતાપસવરાન્વયોદ્ભવમ ॥ ૮.૧૮ ॥

કરુણાકરઃ સવસુદેવમોદદો ભગવાન પુરાઽહિમકરાન્વયેઽભવત ।
જિતવાન દિશો દશરથોઽગ્ર્યસંપદો જનકો બભૂવ ભુવિ યસ્ય વૈરિહા ॥ ૮.૧૯ ॥

ભુજગેશ્વરોઽપિ ભુવનેશ્વરપ્રિયઃ સમજન્યથારિદરજન્મ ભુવ્યભૂત ।

તમમુષ્ય કાંતિવિજિતેંદુમગ્રજં રમણીયમાહુરિહ રામનામકમ ॥ ૮.૨૦ ॥

જનકેન સોઽથ વિરહાસહિષ્ણુના મુહુરીક્ષિતો વનમનીયત પ્રભુઃ ।
ચકિતેન દુષ્ટજનતસ્તપસ્વિના તત આસુરીં નિશિચરીં જઘાન સઃ ॥
૮.૨૧ ॥

મુનિસપ્તતંતુકૃતવૈરબંધનં કટુકેશ્ચરિષ્ટપદમુખ્યદુર્જનમ ।
ક્ષપયંતમુદ્યતસુબાહુમાહવે તમથાભ્યનંદદમરાદિસદ્ગણઃ ॥ ૮.૨૨ ॥

સવને વિકસ્વરગુણસ્વરદ્વિજે સ્ફુરિતે ચરન સકલગોકુલપ્રિયઃ ।
ઈતકામતાપસરસાર્દ્રધીગિરઃ પ્રતિલાળયન્નરમતૈષ સુંદરીઃ ॥ ૮.૨૩ ॥

સહજાન્વિતઃ સકલમિત્રસંયુતો મધુરાં પુરીં જનકવલ્લભાં ગતઃ ।
પ્રવિશન્નિમાં સ જગદેકસુંદરો નરનાર્યુદારનયનોત્સવોઽભવત ॥ ૮.૨૪ ॥

અથ ખંડિતેશ્વરધનુઃ સ લીલયા ક્ષપિતોગ્રસેનનૃપપુત્રપૌરુષઃ ।
સમુપાસ્ય વિપ્રગુરુમબ્જભૂગુરુઃ સ્વજનાનમોદયદમેયતેજસા ॥ ૮.૨૫ ॥

કમલામયં કમલપત્રલોચનાં ભુવમાગતાં નૃપસુતાં ગૃહીતવાન ।
નિજલીલયા વિજિતરાજશાત્રવો મુદમાપદાપ્ય પુરમબ્ધિદુર્ગમમ ॥ ૮.૨૬ ॥

સ જગામ માતૃજનતુષ્ટયે કિલ ત્વરિતોઽવનં વિદધદીપ્સિતં સતામ ।
સહ ભાર્યયાઽપિ શુભયા મહાજયધ્વજલક્ષ્મણાગ્ર્યસુહૃદા વિના[ઽ]મુદા ॥

૮.૨૭ ॥

સમતીતપર્વતપુરોગદુર્ગમઃ ખરદૂષણાદિસુજનદ્વિષો બહૂન ।
સ નિહત્ય વિશ્વભયદં સુદુસ્સહં નરકં મહાતમ ઉતાનયત ક્રમાત ॥ ૮.૨૮ ॥

રુચિરાશ્રમાજિરચિતાગ્ર્યતેજસા પ્રિયયા પ્રિયો ભુવનમાન્યયા સમમ ।
ભૃશમાકુલી કૃતમદપ્રમાદવત્સુરપારિજાતહૃદવાપ ધામ સઃ ॥ ૮.૨૯ ॥

હરિતામધીશનરદેવમંડલં દશકં વિજિત્ય પરભીષણં મુહુઃ ।
સ્ફુરિતામિહ પ્રિયતમાં નિજશ્રિયં ભગવાનુપૈક્ષત હરંતમપ્રિયમ ॥ ૮.૩૦ ॥

અભિનંદિતઃ પવનનંદનાદિભિઃ સ કદાચિદિંદ્રસુતવર્ધકો ગવા ।
નિજરાજ્યમાત્મદયિતાય દત્તવાન હરિસૂનવે હતવિપક્ષમુત્તમમ ॥ ૮.૩૧ ॥

મુદમાપ્ય તત્ર દયિતોરુવાર્ત્તયા મધુહા મરુત્સુતમુખપ્રવૃત્તયા ।
હરિતિગ્મયક્રલસિતોઽબ્ધિમધ્યગં પ્રયયૌ સ પુણ્યજનસેવિતં પુરમ ॥ ૮.૩૨ ॥

પૃથુકુંભકર્ણગજરાજમુદ્ધતં સસહોઽદરં સવિબુધેંદ્રશાત્રવમ ।
ધરણીભરં પૃથુલચક્રમક્ષિણોત નિશિતેષુચક્રકૃતવિક્રમઃ પ્રભુઃ ॥ ૮.૩૩ ॥

અથ ભાર્યયા હુતવહં પ્રવિષ્ટયા સહિતઃ સહોદરપુરસ્સરૈરપિ ।

અયમાપ્ય ધામ ચિરમિશ્ટદઃ સતાં નિજમૂલરૂપપરમૈક્યમેયિવાન ॥ ૮.૩૪
॥

મહિદાસપૂજ્યચરણો દ્વિજાદભૂદ વિદિતાત સ વિષ્ણુયશસોઽમલાત્મનઃ ।
ઈહ યો દધે જગતિ પાપશાંતયે બહુધામહેતિમતિદીપ્તગોસ્થિતિમ ॥ ૮.૩૫
॥

સુતપોરુચેરયમપાપકર્દમાત નનુ માનવી તનયતામુપેયિવાન ।
સમયેન ભૂરિનિજભક્તિપૂરિતાન સમજીજનત સુમનસઃ સ દેવરાટ ॥
૮.૩૬ ॥

સુબૃહત્પયોધરમિથઃ પ્રસંહતિપ્રકટીભવત્પરમયૌવનાકૃતિઃ ।
અસુરાહિતાં વરવિલાસિની તનુઃ પ્રદદાવમુષ્ય સુરરાશયે સુધામ ॥ ૮.૩૭
॥

સુજનાય દત્તપદ આત્મશુદ્ધિદઃ સુકુમારરૂપ્યભવદેષ શાશ્વતઃ ।
અનસૂયયા શુચિમનીષયા ધૃતઃ પરમાદરેણ મુનિપુંગવોઢયા ॥ ૮.૩૮ ॥

દયિતઃ સતામૃષભ એષ ભૂધરો વપુરુદ્વહન પરમહંસ લક્ષણમ ।
વ્યહરદ્વલક્ષતમપક્ષશોભનં પરતત્વલિપ્સુસનકાદિવંદિતઃ ॥ ૮.૩૯ ॥

ઉદપાદિ ધર્મતનયો હ્યયં હરિઃ નરદેવસોદર ઉદારવિક્રમઃ ।
અપિ કૃષ્ણ ઈત્યભિહિતો મુદે સતાં સ્વયમેવ યસ્ય સહજો વ્યજાયત ॥

૮.૪૦ ॥

પરમાત્મને સતતમેકરૂપિણે દશરૂપિણે શતસહસ્રરૂપિણે ।
અવિકારિણે સ્ફુટમનંતરૂપિણે સુખચિત્સમસ્તતનવે નમોનમઃ ॥ ૮.૪૧ ॥

ઈતિ ચિંતયન્નવિરળાંતરો હરિં પ્રણનામ સપ્રણયમાદૃતોઽમુના ।
અજિતૌ પરસ્પરસભાજિતૌ સ તૌ નિકષા નિષીદતિ પુરોપવેશિનૌ ॥
૮.૪૨ ॥

વિવિધા વિધાય કિલ તત્ર સંકથાઃ વદનં મુનીંદ્રતનયસ્ય સુંદરમ ।
અવલોક્ય લોકપતિરાનતં મહાસુખતીર્થમાહ રહસિ સ્મ ગામિમામ ॥
૮.૪૩ ॥

શૃણુ દેવકાર્યમવધાર્ય ધૈર્યવદ યુદુદીર્યમાણમિદમાર્યસમ્મતમ ।
ભવિતાઽન્યદુષ્કરતરં વિધાય તત્તરુણં તવાવતરણં મહાફલમ ॥ ૮.૪૪ ॥

અપિધાય સૂત્રહૃદયં સતાં પ્રિયં પ્રવિધાય ભાષ્યમધુના નિજેચ્છયા ।
અપરૈઃ શ્રુતિસ્મૃતિનિજાર્થદૂષકૈઃ સુતરાં તિરોભવતિ સંવિદાહતા ॥ ૮.૪૫ ॥

અપનેતુમેનમનયં કૃતં ખલૈઃ પ્રતિનેતુમાત્મજનતાં શુભાં ગતિમ ।
કુરુ સૂત્રભાષ્યમવિલંબિતં વ્રજેઃ સુમતેન યોજય કવે શ્રુતિસ્મૃતીઃ ॥ ૮.૪૬
॥

અમિતાં મિતામપિ ગિરં જગદ્ગુરોઃ ઈતિ તાં નિશમ્ય વિરળેતરાંતરઃ ।
વદતાં વરસ્તમવદત તદા તયોઃ વિરહાક્ષમઃ ખલુ ચરાચરેશયોઃ ॥ ૮.૪૭
॥

ભવતોરિતઃ સતતસેવનામૃતે મમ મંક્તુમસ્તુ ભગવન્નનુગ્રહઃ ।
ન લભેય વલ્લભતમેદૃશં સુખં જગતાં ત્રયેઽપિ જગદેકમંગલમ ॥ ૮.૪૮ ॥

કલિકાલકાલિતગુણે ધરાતળે સુજનો ન નૂનમધુનાઽસ્તિ યોગ્યધીઃ ।
પરતત્ત્વવર્ણનમયોગ્યતાવતે નનુ હવ્યદાનમિવ નિંદ્યતે શુને ॥ ૮.૪૯ ॥

ઈતિ તં બ્રુવાણમયમબ્રવીદ વિભુઃ ભુવિ સંતિ સૌમ્ય પુરુષા ગુણોચિતાઃ ।
વિમલાન મણીનિવ ગુણોજ્ઝિતાનિમાન દયયા વિશોધય વિશુદ્ધગોગણૈઃ ॥
૮.૫૦ ॥

તવ કીર્તિરાર્તિમતિમાત્રમાનયેદશુભાન પ્રભાકરવિભેવ કૌશિકાન ।
કમલાકરાનિવ શુભાન પ્રબોધયેત પરમાજ્ઞયા મમ વિશેષતોઽનિશમ ॥
૮.૫૧ ॥

ઈતિ સા મહીધરમુખાદ વિનિઃસૃતા જગતાં સુખાય વિશદા સરસ્વતી ।
દ્વિજરાજગોવિષયતાતિપૂરિતં પ્રવિવેશ મધ્વપૃથુબુદ્ધિવારિધિમ ॥ ૮.૫૨ ॥

મતમિત્યવેત્ય મહિતં મહતોઃ અભિધાય બાઢમિતિ ધીરમતિઃ ।
અનયોર્નિયોગમધિરોપિતવાન સ્વશિરસ્યનન્યસુવહં પ્રણમન ॥ ૮.૫૩ ॥

આમ્નાયાસ્ત્રય ઈવ તત્ત્વબોધકાસ્તે પાપઘ્નાસ્ત્રય ઈવ પાવકાઃ પ્રજાનામ
।
લોકા વા સકલભૃતસ્ત્રયોઽત્ર રેજુઃ સાનંદા મુનિસુતધર્મસૂનુમધ્વાઃ ॥
૮.૫૪ ॥

॥ ઈતિ શ્રીમત્કવિકુલતિલક ત્રિવિક્રમપંડિતાચાર્યસુત
નારાયણપંડિતાચાર્યવિરચિતે શ્રીમધ્વવિજયે
આનંદાંકિતે અષ્ટમઃ સર્ગઃ ॥

www.yousigma.com